INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:6(3), June 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in
Cover Page

# यतीन्द्रविमलचौधुरिविरचिते भारतविवेकनाटकाधारे स्वामिविवेकानन्दस्य चरित्रचित्रणम्

**ड. अविनाश-गायेन:**
सहायक-अध्यापकः, संस्कृतविभागः
घाटाल-रवीन्द्र-शतवार्षिकी-महाविद्यालयः
पश्चिमवङ्गः, भारतम्

**शोधसार:**

यतीन्द्रविमलचौधुरिविरचितं भारतविवेकम् इति नाटकं स्वामिविवेकानन्दस्य जीवनचरिताधारितं आधुनिकसंस्कृतनाट्यसाहित्यस्य एकं महत्त्वपूर्णं कृतिम् अस्ति। अस्य शोधस्य उद्देश्यं नाटके प्रस्तुतस्य स्वामिविवेकानन्दस्य चरित्रचित्रणस्य विश्लेषणं, तस्य आध्यात्मिक-दार्शनिक-सामाजिकदृष्टीनां विवेचनं च अस्ति। नाटककारः विवेकानन्दं केवलं संन्यासिनं न दर्शयति, अपि तु कर्मयोगिनं, राष्ट्रचिन्तकं, मानवतावादिनं च रूपेण चित्रयति। अस्मिन् नाटके नरेन्द्रनाथरूपेण तस्य बाल्यकालात् आरभ्य ईश्वरान्वेषणं, गुरुः श्रीरामकृष्णपरमहंससमीपगमनं, तथा तदनन्तरं विश्वधर्मसभायां तस्य ऐतिहासिकभाषणपर्यन्तं जीवनयात्रा सजीवतया वर्णिता अस्ति। श्रीरामकृष्णः तस्य आध्यात्मिकजीवनपरिवर्तनस्य मूलकारणं भवति इति नाटककारः विशेषतया प्रतिपादयति। अद्वैतवेदान्तस्य "सर्वं खल्विदं ब्रह्म" इति सिद्धान्तः विवेकानन्दस्य सम्पूर्णजीवनदृष्ट्या सह संयोजितः दृश्यते। दारिद्र्यनिवारणम्, शिक्षाप्रसारः, धर्मसमन्वयः, तथा राष्ट्रजागरणम् इत्यादयः विषयाः विवेकानन्दस्य विचारैः सह समन्विताः सन्ति। सः भारतस्य आध्यात्मिकशक्तिं विश्वमञ्चे प्रतिष्ठापयति इति नाटककारस्य अभिप्रायः स्पष्टः दृश्यते।

तद्धेतुः 'यतीन्द्रविमलचौधुरिविरचिते भारतविवेकनाटकाधारे स्वामिविवेकानन्दस्य चरित्रचित्रणम्' इति विषयाधारिकृत्य प्रबन्धोऽयं प्रस्तुयते।

**कुञ्जीशब्दाः** – नाट्यकारस्य परिचयः, भारतविवेकम्, स्वामिविवेकानन्दस्य चरित्रचित्रणम्, अद्वैतवेदान्तः, राष्ट्रजागरणम्, मानवतावादः।

## प्रस्तावना

आधुनिकसंस्कृतसाहित्ये अद्यावधिः ये खलु संस्कृतपण्डिताः रराजमानाः सन्ति, तेषु परमपूजनीयः सम्माननीयः संस्कृतपण्डितः आधुनिकसंस्कृतसाहित्यगगने उज्ज्वलनक्षत्ररूपेण विराजमानः अष्टविंशतिः नाटकानां रचनाकारः यतीन्द्रविमलचौधुरी महोदयः अन्यतमः भवति।

## नाट्यकारस्य परिचय:

भारतविवेकनाटकस्य नाट्यकारः यतीन्द्रविमलचौधुरी (1909–1964) वाङ्लादेशस्य चित्तग्रामजनपदे कदूर्खिलग्रामे जातः। जन्मकालः 1909 ईस्वीयवर्षे इति लिखितमस्ति। तस्य पिता रसिकचन्द्रचौधुरीः प्राथमिकशालायां शिक्षकः सन्नपि सर्वस्वं त्यक्त्वापि कलिकातायां लन्दने च यतीन्द्रस्य उच्चशिक्षाव्ययमुवाह। यतीन्द्रः स्वयमपि छात्रजीवने अर्थार्जनमकरोत्। पितुः प्रेरणया संस्कृते सविशेषमस्य रुचिरासीत्। 1926 तमे ईस्वीयवर्षे सः वैदिककर्मकाण्डेषु नारीति विषयमाश्रित्य शोधोपाधये लन्दनविश्वविद्यालयं प्रविष्टः, 1934 तमेऽब्दे

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:6(3), June 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

चाभिलषितामुपाधिमधिगतवान्। 1937 ईस्वीयवर्षपर्यन्तमयमिण्डिया-ऑफिस-पुस्तकालये तथा च लन्दनविश्वविद्यालये कार्यरतः आसीत्। तत्रैव दर्शनविषये शोधोपाधिं प्राप्तवत्या रमया तेन सङ्गतिः कृता, परिणयश्च कृतः। भारतं प्रत्यागतः यतीन्द्रः वङ्गीयसंस्कृतपरिषदः सचिवरूपेण, संस्कृतमहाविद्यालयस्य प्राचार्यत्वेन, प्रेसिडेन्सीमहाविद्यालये प्राध्यापकत्वेन तथा विभागाध्यक्षत्वेन च संस्कृतविद्यायाः उन्नयने भृशमवदत्। ऑक्सफोर्डविश्वविद्यालयस्य प्रथमभारतीयशोधच्छात्रया रमाचौधुरीमहोदयया (नी-वोस्) सह विवाहं कृतवान्। प्राच्यवाणीसंस्थया यथा तेन प्राच्यविद्यायाः प्रसारः कृतः तथैव प्राच्यवाणीनाट्यसंस्थया संस्कृतपालिनाटकानां मञ्चनमकारयत्। संस्कृतस्य प्रचुरप्रचाराय दत्तप्राणः सः 'देवभाषानृपतिः' इति कथ्यते स्म। उत्तमसमीक्षकस्य तस्य शोधपत्राणि बहुधा आङ्ग्ल-वङ्ग-संस्कृतभाषासु प्रकाशितानि।

**कृतयः**

यतीन्द्रविमलचौधुरिणा अष्टाविंशतिः (28) नाटकानि विरचितानि सन्ति। यथा— स्वप्नरघुवंशम्, धृतिसीतम्, महाप्रभुहरिदासम्, निष्किञ्चनयशोधरम्, शक्तिसारदम्, मुक्तिसारदम्, भक्तिविष्णुप्रियम्, प्रीतिविष्णुप्रियम्, भारतहृदयारविन्दम्, विमलयतीन्द्रम्, भुवनभास्करम्, महिमामयभारतम्, भास्करोदयम्, भारतभास्करम्, आनन्दराघवम्, दिनदासरघुनाथम्, भारतजनकम्, मिलनतीर्थभारतम्, भारतविवेकम्, विश्वविवेकम्, अमरमीरम्, भारतलक्ष्मीनाटकम्, भारतराजेन्द्रम्, सुभाषसुभाषम्, देशबन्धुदेशप्रियम्, वेनिसेवणिजम्, ओथेलो तथा रक्षकश्रीगोरक्षम्।

**भारतविवेकम्**

भारतविवेकमिति नाटकं 1963 ईस्वीयवर्षे प्रकाशितम्। अत्र विवेकानन्दस्य सत्त्वविकासो निरूपितः। विवेकानन्दस्य विचारसरणिरित्थं प्रकटिता - "अहो! लक्ष-लक्ष-संन्यासिनो वयं भारतवर्षस्य कठोरश्रमलब्धान्नपुष्टा देशवासिनां हितार्थं किं कुर्मः? अपि दर्शनशास्त्रस्य जटिलतथ्यमात्रभाषणपरा एतान् न वञ्चयामः?" इत्यादि।

ततः सूत्रधार-नटीसंवादेन नाट्यस्य प्रस्तावना क्रियते। श्रीरामकृष्णधर्मदर्शनप्रचारजगद्विमोहनस्य स्वामिश्रीविवेकानन्दस्य पवित्रजीवनचरितमवलम्ब्य किञ्चिदभिनवं नाटकमिदम्। श्रीरामकृष्णं प्रति जननीसारदामणिं प्रति च प्रगाढप्रेमैव स्वामिविवेकानन्दजीवनस्य सर्वसार्थक्यस्य मूलकारणम्। भगवान् श्रीरामकृष्णस्तथाम्बिका श्रीसारदामणिर्वा यथैच्छत् तथैव श्रीस्वामीजीमहाराजोऽकरोत्।

ततः प्रथमदृश्यस्य आरम्भो भवति 1881 ख्रीष्टाब्दे कलिकातानगरस्य सिमुलियाक्षेत्रे श्रीसुरेन्द्रनाथमित्रस्य गृहे श्रीश्रीपरमहंसदेवेन सह श्रीनरेन्द्रस्य प्रथमसाक्षात्कारविषयमधिकृत्य। एवं द्वादशदृश्ययुक्तं रूपकमिदं स्वामिनः विवेकानन्दस्य विश्वविजयकामनया समाप्तिं याति।

अस्मिन् नाटके महामानवस्यैकस्य समग्रजीवनदर्शनं पाठकानामुदात्तीकरणाय कल्पते।

**स्वामिविवेकानन्दस्य चरित्रचित्रणम्**

समग्रः संसारः यदा कलिकलुषेण कलुषितो भवति, धर्मस्य लोपो भवति, अन्यायेन अत्याचारेण वा "त्राहि माम्, त्राहि माम्" इति चीत्करोति, तदा साधूनां परित्राणाय दुराचारिणां विनाशाय, त्रितापदग्धमानवमानसे शान्ति-प्रीति-मैत्रीणाममन्दमन्दाकिनीं प्रवाहयितुं महापुरुषाणां जन्म भवति। साधूक्तं श्रीमद्भगवद्गीतायाम्-

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:6(3), June 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

Cover Page

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥

आङ्ग्लकविः लङ्गफेलो वदति-

Lives of great men all reminds us,
We can make our lives sublimes,
And departing leave behind us,
Footprints on the sands of time.

महापुरुषाणां निरलसकर्मसाधना, त्यागपूतं जीवनम्, निष्कामसेवा, जातिवर्णधर्मनिर्विशेषेण मानवसमाजस्य कल्याणसाधनव्रतम् - एतत् प्रत्येकजनस्य अनुकरणीयम् अनुसरणीयं च। युगे युगे महापुरुषाः भवन्ति समाजस्य प्रकृतबान्धवाः, दार्शनिकाः, दिग्दर्शकाश्च। एते सांसारिकवाद-विसंवाद-स्वार्थपरता-सङ्कीर्णताभ्यः बहुदूरे स्थित्वा मानवीयदुःखदैन्यैः सह अहोरात्रं सङ्ग्रामं विधाय, जीवनस्य शेषदीपशिखानिर्वापणपर्यन्तं मानवकल्याणव्रतं पालयन्ति। सत्यमुक्तम्- "A wise man does at first what the fool must do at last."

यदा मानवानां स्वकर्मविषयेषु शङ्का भवति, तदा ते श्रेष्ठपुरुषाणां चरित्रम् आचरणं च पश्यन्ति, तदनुकुर्वन्ति च। यथोक्तम्— "महाजनो येन गतः स पन्थाः।" संसारे अन्ये पुरुषाः महापुरुषाणामाचरणमनुकुर्वन्तीति श्रीमद्भगवद्गीतायामपि भगवता श्रीकृष्णेन उक्तम् -

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥

वङ्गेषु कश्चन शुभदिवस आसीद् 1863 संवत्सरस्य जनवरीमासस्य 12 दिनाङ्कः। 1269 वङ्गाब्दस्य पौषसङ्क्रान्तिः, कृष्णसप्तमी तिथिश्च। अस्मिन् शुभयोगे उत्तरकलिकातायां दत्तपरिवारे जन्मालभत कश्चन योगजन्मा विलक्षणः शिशुः, संसारं सम्मोहयन्निव। पिता विश्वनाथदत्तः कलिकातोच्चन्यायालये अधिवक्ता आसीत्। माता भुवनेश्वरीदेवी। वीरेश्वरस्य शिवस्य शरणं गतौ दम्पती अस्मिन् शुभक्षणे पुत्ररत्नं प्राप्य तस्य नामकरणं कृतवन्तौ- "विले" इति। प्रचलितं नाम तु नरेन्द्रनाथ इति। तेन सह भुवनेश्वरीमातुः वङ्गमातुश्च भाग्यरविरिव समुदितः। सत्यमेवमुक्तं कविना-

"अरुणकिरण उछलि उठिल उदिले येदिन वङ्गे।"

बी.ए. परीक्षामुत्तीर्य विध्यध्ययनसमये स्वामिनः पारिवारिकी स्थितिः सम्यक् नासीत्। अनन्तरकाले श्रीरामकृष्णदेवात् दीक्षितः सन् 1886 ईस्वीयवर्षस्य अगस्टमासस्य 16 दिनाङ्के गुरोर्महाप्रयाणानन्तरं पूर्णतया तस्य धर्मप्रसारे मतिं न्यधात्। स्वामीविवेकानन्दनाम्ना परिचितोऽयं नवारुणसमस्तरुणः संन्यासी 1893 ईस्वीयसंवत्सरे सेप्टेम्बरमासस्य 11 दिनाङ्के अमेरिकादेशस्य शिकागो-धर्ममहासभायां भाषणमकरोत्। ततः सः विदेशभ्रमणमकरोत्। भारतं प्रत्यागत्य 1897 ईस्वीयवर्षस्य मेमासस्य 1 दिनाङ्के वेलूरे पुण्यतीर्थे रामकृष्णमिशनस्य स्थापनामकरोत्। 1902 ईस्वीयवर्षस्य जुलाईमासस्य 4 दिनाङ्के तस्य दिव्यात्मनः महाप्रयाणमभवत्।

तैत्तिरीयोपनिषदि आम्नातमस्ति -

मातृदेवो भव। पितृदेवो भव।
आचार्यदेवो भव। अतिथिदेवो भव॥

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:6(3), June 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

तदनुसारं विवेकानन्दोऽवदत् - "दरिद्रदेवो भव, मूर्खदेवो भव।" एतदुपनिषदां चिन्ताधारायाः एव परिणतिः, तथा च अद्वैतवेदान्तस्य वृत्तमध्ये एव साधनायाः आधुनिकतमा योजना।

अतः विवेकानन्देन लिखितम्-

ब्रह्मादिस्थावरकीटपरमाणुपर्यन्तेषु
सर्वभूतेषु स एव प्रेममयः स्थितः।

मनः प्राणं शरीरं च समर्पय, हे सखे,
एतेषां सर्वेषां पादयोः श्रद्धया॥
बहुरूपेण तव सम्मुखे सन्निहिते
त्यक्त्वा कुत्र ईश्वरं अन्विष्यसि?
यः जीवेषु प्रेम करोति, स एव ईश्वरं सेवते॥

स्वामिनः संस्कृतप्रीतिः स्मरणीया एव। मरणशय्यायामपि स्वामिवर्यस्य अध्यापनम्, उपदेशः, संस्कृतचिन्तनं च प्रचलितमासीत्। यतो हि सः जानाति स्म यत् संस्कृतं विना भारतस्य परिचयो नास्ति। स्वामिना उक्तं यत् भारते संस्कृतं सम्मानश्च परस्परं सहगामिनी स्तः। अग्रे सः वदति - "युष्माभिः किमर्थं संस्कृतज्ञैर्भूयते? भारतस्य सर्वेषां वर्णानां कृते संस्कृतशिक्षायाः विस्ताराय किमर्थं लक्षशो रूप्यकाणि न व्ययीक्रीयन्ते?" इत्यादि।

अतः संस्कृते स्वामिनं विवेकानन्दमधिकृत्य अपि बहूनि काव्यानि लभ्यन्ते। यथा -

विवेकानन्दचरितम् — विश्वनाथकेशवछत्रे।
विवेकानन्दचरितम् — गजाननबालकृष्णपलसुले।
विवेकानन्दचरितम् — श्रीजीवन्यायतीर्थः।
विवेकानन्दचरितामृतम् — गणेशदत्तशर्मा।
श्रीविवेकानन्दकर्मयोगसूत्रशतकम् — स्वामीहर्षानन्दपुरी (मैसूर)।
श्रीविवेकानन्दचरितम् — यतीन्द्रविमलचौधुरी।
विश्वविवेकः — विश्वभानुः नारायणपिल्लै के. पी.।
स्वामिविवेकानन्दचरितम् — त्र्यम्बकशर्माभण्डारकरः।
यतीन्द्रजीवनचरितम् — शिवकुमारशास्त्री (वाराणसी)।
यतीन्द्रविमलम् — रमाचौधुरी।
अन्तःकान्तिः — आर्. गणेशः।

यदि पृथिव्यां कोऽपि देशस्तिष्ठेद् यः "पुण्यभूमिः" इति नाम्ना विशेषितः स्यात्, यत्र मनुष्यजातौ सर्वोत्तमतया क्षमा-दया-पवित्रता-शान्तभावप्रभृतीनां सद्गुणानां विकासो जातः, यदि कश्चिद् देशस्तिष्ठेद् यत्र सर्वाधिकतया आध्यात्मिकतायाः अन्तर्दृष्टेश्च विकासो जातः, तर्ह्यवश्यमेव वक्तुं शक्यते यदसौ मातृभूमिः भारतवर्षमेव। एवंरूपेण वर्णनेन भारतस्य अतिगौरवं विघोषितवान् स्वामी विवेकानन्दः।

**वीरः संन्यासी स्वामी विवेकानन्दः**

भारतपरिभ्रमणावसरे सः जयपुरमहाराजस्य सभापण्डितेभ्यः पाणिनेरष्टाध्यायीम् अपठत्। क्षेत्रिराजस्य सभापण्डितात् नारायणदासात् पतञ्जलेर्महाभाष्यमधीतवान्। पोरबन्दरस्य पाण्डुरङ्गात् वेदान्तमधीतवान्।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:6(3), June 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

संस्कृताध्ययने, संस्कृतभाषणे, लेखने चापि तस्य विशेषाग्रह आसीत्। स्वामिपादानां विशेषाग्रह आसीद् यत् भारतदेशे वैदिकधर्मस्य प्रचारो भवेत्, वेदान्तस्य च प्रसारः स्यात्। न केवलं भारते, अपि तु समग्रायां जगत्यां सनातनधर्मस्य, विशेषतः वेदान्तस्य, प्रचारः स्यादिति तस्याभिप्रायः आसीत्। अनेनैव भारतं विश्वे जगद्गुरुपदं प्राप्स्यतीति सः मन्यतेति।

स्वामिपादानां शास्त्रेषु, आर्षवचनेषु च अगाधो विश्वास आसीत्। भारतीयशास्त्रपरम्परायां तस्य गौरवभावोऽप्यासीत्। संस्कृतभाषैव तस्याः शास्त्रपरम्परायाः वाहिका धात्री च। स्वामिपादानां संस्कृतभाषाविषये महती श्रद्धा आसीत्। वैश्विकफलके हिन्दुत्वस्य, हिन्दुधर्मस्य, भारतीयदर्शनस्य, भारतीयजनजीवनस्य, समाजमूल्यानां च - किं बहुना - संस्कृतस्यापि मूल्यायनं महत्त्वेन स्वामिना विवेकानन्देनैव कृतम्। जीवने सर्वत्र संस्कृतस्य आवश्यकतामनुभूय सः शिष्यान् संस्कृतपठनाय प्रेरितवान्। जीवनस्य अन्तिमदिवसेऽपि सः शिष्यान् पाणिनीयव्याकरणं पाठितवान्।

असाधारणी आसीद् विवेकानन्दस्य वाग्मिता। वाक्शिल्पी विवेकानन्दः। तस्य शक्तिप्रदायकभाषणादिभिः भारतवासिन आत्मचेतनां प्राप्तवन्तः। स एव अस्मान् सर्वान् भारतवासिनः स्मारयति यत्- "मूर्खो भारतवासी, दरिद्रो भारतवासी, चाण्डालो भारतवासी- अस्माकं भ्राता।" जनसेवार्थं रामकृष्णसङ्घस्य प्रतिष्ठा तस्य अन्यतमा श्रेष्ठा कीर्तिर्विद्यते। 1902 ईस्वीयाब्दस्य जुलाईमासस्य चतुर्थदिनाङ्के प्रातःस्मरणीयोऽयं महामानवः पार्थिवदेहं विहाय रामकृष्णलोकं प्रस्थितः।

केवलं यतीन्द्रविमलचौधुरिणैव स्वामिनमधिकृत्य नाटकद्वयम् - भारतविवेकम्, विश्वविवेकम्- तथा च विवेकानन्दचरितम् इति चम्पूकाव्यं प्रणीतम्। भारतविवेके स्वामिनः विदेशयात्रापर्यन्तं कथावस्तु वर्णितमस्ति। नाट्यकारस्य दृष्ट्या विवेकानन्दस्वामिनः चारित्रिकविश्लेषणम् अधस्तात् क्रियते-

**अतुलनीयगुणवैशिष्ट्ययुतः**

सर्वेऽपि जनाः स्वामिनः वैशिष्ट्यमभिलक्ष्य तस्य प्रशंसां कुर्वन्ति। तत्र वैचित्र्यं किमपि नास्ति। स्वयं गुरुः श्रीरामकृष्णोऽपि तस्य प्रशंसायां शतमुखो भवति। सः केशवचन्द्रमुद्दिश्य वदति-

"सत्यं केशव! अतुलनीयः खलु नरेन्द्रः। तुलनामुखेन वक्तुं शक्यते- अन्येषां कस्यचन दशदलानि, कस्यचन वा षोडशदलानि; किन्तु पद्मेषु नरेन्द्रो मम सहस्रदलपद्मम्। पुष्करिणीषु नरेन्द्रः प्रकाण्डतमो यथा हालदार-पुष्करिणी। मत्स्येषु नरेन्द्रो रक्तचक्षुः रोहितः, अन्ये सर्वे क्षुद्रशफरसदृशाः।"

तस्य संसर्गेण नितरां प्रभावितः क्षेत्रिमहाराजो वदति- "यदा प्रभृति भवत्कृपाभाजनं जातोऽस्मि, तत एव सूर्योदयकरस्पर्शेन कमलदलानीव सहस्रदलानि मम जीवनकमलस्य विकसितानि। गोमुखीमुखादारभ्य यथा भगीरथखातावच्छिन्ना भागीरथीधारा भारतवर्षस्य उत्तरदक्षिणदिशौ संयोज्य निरन्तरप्रवाहेण प्रवहति, तद्वत् भवदुपदेशवाणीखातावच्छिन्नास्मज्जीवनधारापि वंशपरम्पराद्युपान्तप्रदेशानधिकृत्य, उर्वरीकृत्य च पुण्यपरिवारजीवनभूमिं सहस्रधा नितरां खरवेगेन प्रवहति।

भारतमहासागरस्योर्मिमाला देशस्य सुखदुःखानि संगृह्य दूरे, बहुदूरे, दूरतमे सुदूरे च प्रसरति; तथापि निरन्तरं देशमातृकापदचुम्बनसार्थक्येन स्वजीवनं संरक्षतीव ध्रुवम्। तद्वदस्माकं भवद्भक्तानां जीवनोर्मिमालाः सम्प्रसरन्तु नाम दिग्दिगन्तेषु; किन्तु भवच्छ्रीचरणान्तिकतमस्पर्शं विना कथं वयं जीवितं धारयिष्यामः?"

**श्रीरामकृष्णभावधाराप्रसारकः**

नाट्यकारः प्रथमदृश्ये नान्दीपाठे एव स्वामिनः अयं गुणः वर्णितवान्। यथा—

रामकृष्णमताम्भोधि-मथनाचल-रूपिणे।
सारदामणि-सौख्याय युगान्तध्वान्तहारिणे॥
भारतश्रीविवेकाय पुण्यधारा-प्रसारिणे।
शतवर्षजयन्त्याख्ये उत्सवे नो नमो नमः॥

ततः सूत्रधार-नटीसंवादेन नाट्यस्य प्रस्तावनायामपि तदेवोच्यते - 'श्रीरामकृष्णधर्मदर्शनप्रचारजगद्विमोहनस्य स्वामिश्रीविवेकानन्दस्य पवित्रजीवनचरितमवलम्ब्य किञ्चिदभिनवं नाटकमस्माभिरभिनेतव्यम्।'

श्रीरामकृष्णं प्रति जननीसारदामणिं प्रति च प्रगाढप्रेमैव स्वामिविवेकानन्दजीवनस्य सर्वसार्थक्यस्य मूलकारणम्। भगवान् श्रीरामकृष्णस्तथाम्बिका श्रीसारदामणिर्वा यथैच्छत् तथैव श्रीस्वामीजीमहाराजोऽकरोत्।

युगे युगे भारतवर्षतोऽस्माद् गता हि दूता दिशि दिश्यनेके।
तैस्तत्र तत्र स्वमतप्रतिष्ठा कृता विशेषात् प्रतिभानुरूपम्॥
एकोऽपि तुष्टः प्रभुरामकृष्णः कां कां न सिद्धिं मनुजाय दत्ते।
मात्रा पुनः सारदयापि तुष्ट्या कृतप्रसादस्य किमस्ति वाच्यम्॥

**सुन्दरं शरीरम्**

स्वामीजी यथा वाग्मी आसीत् तथा सुन्दरः अपि। प्रथमाङ्के प्रथमदर्शनेन एव गुरुदेवः तस्य रूपेण विमुग्धः सन् स्वगतं वदति-

"अहो! एष एव स बालको यदर्थमहं नक्तन्दिवं प्रार्थये। कोमलकुञ्चितकेशदामसुसज्जशिरस्कः, आकर्णविस्फारितनयनोऽयं दर्शनदानेनैव मामतुल्यं नन्दयति। हृदयतटिनी मम सगर्जनं धावति तरां सागरसङ्गमे सागरजलस्फीतिप्रभावात् यथा गङ्गातोयधारा। नटनृत्यचटुलमिव भासते मम चित्तस्थलं, यत्र मम स्मृतिगुल्मदलं चटुलं कम्पते मलयपवनस्पर्शात् पुलकाकुलं वेणुवनं यथा।"

**अन्धविश्वासी नासीत्, युक्त्या परीक्ष्य सर्वं गृह्णाति**

पाश्चात्यशिक्षया शिक्षितो नरेन्द्रः युक्तिवादी आसीत्। सर्वमपि सः युक्त्या सिद्धं मनःपूर्वकं चेत् स्वीकरोति स्म। यथा नरेन्द्रः वदति- "चक्षुः-कर्णादिकेन्द्रियाण्यस्मान् सर्वान् प्रतारयन्तीति। पुनर्यदि विषयविशेषस्य वासना हृदि सदा जागर्ति तदेतत् सत्यमिवाभ्रान्तं लक्ष्यते।"

**भगवत्प्राप्तिव्याकुलता**

स्वामिनः ईश्वरान्वेषणविषये वयं जानीमः। "क ईश्वरस्य प्रत्यक्षदर्शनं कृतवान्? कारयितुं च शक्नोति?" इति सः एकैकं गुरुमभिगम्य पृच्छति स्म। तत्र केवलं श्रीरामकृष्णदेव एव तेन सहमतः अभवत्। नाटकेऽस्मिन् तदपूर्वतया वर्णितम्। यथा- नरेन्द्रनाथः (कराघातपूर्वकं कवाटमुद्घाट्य तस्य कक्षं प्रविश्य)- "तथास्तु वा, अन्यथा वा भवतु; अपि भवान् श्रीभगवन्तं दृष्टवान्? महर्षिदेवेन्द्रनाथमप्यहं पृष्टवान्- 'अपि भवान् भगवन्तं दृष्टवान्?' इति। नाहं तत्र किञ्चित् सदुत्तरं लब्धवान्। केवलं स मामुक्तवान्- 'नरेन्द्र! तव चक्षुषी दृष्ट्वा बुध्ये यत् त्वं योगी भविष्यसि' इति। किन्तु तेन मम किम्? अहं भवतस्तदेव ज्ञातुमिच्छामि..."

रामकृष्णः (भावाविष्टः)-

सत्यं वच्मि नरेन्द्राय, प्रत्यक्षमीश्वरो मया।
सर्वदा दृश्यते पूर्णस्ततोऽपि स्पष्टतो हि सः॥

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:6(3), June 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

**संसारवैराग्यम्**

यदा स्वामिनः पितृवियोगोऽभवत्, परिवारश्च दुःखसन्तप्त आसीत्, तदा सः गुरुसमीपे सर्वं दुःखं न्यवेदयत्। गुरुः तं मातरं प्रार्थयितुमुक्तवान्। किन्तु सः स्वार्थपरभावेन स्वपरिवारस्य सौख्यं न प्रार्थितवान्। नरेन्द्रः गुरुमुवाच-

"देव! देवीसकाशे कथमप्यहं तद्विषयकं किञ्चिद् वक्तुं न शक्तोऽस्मि। तस्याः दर्शनमात्रेणैव मम चित्तं विषयान्तरनिविष्टं भवति। बहिर्भूतं किञ्चिदपि नाहं स्मरामि। तत्र भवन्त एव प्रमाणम्। जनन्यै केवलमहमुक्तवान्- 'जननि! विवेकं वैराग्यं ज्ञानं भक्तिं च मह्यं देहि, यथा त्वत्कृपया त्वां द्रष्टुं समर्थो भवेयम्।' देवदेव! वारत्रयं भवदादेशेनाहं गतवान्। जनन्या भुवनमोहनरूपेण श्रीमन्दिरं समुद्भासितम्। वराभयकरौ विस्तार्य सुमनोहरं हसन्ती, मृन्मयाधारभूता चिन्मयी मम जननी। तुच्छं संसारवृत्तान्तं नाहं कदाचन तस्यै वक्तुं पारयामि, पारयिष्यामि वा। नाहं कदाचन मातृसमीपे आत्मानं प्रभावयितुं शक्ष्यामि। कदापि न।"

**मूर्तिपूजा**

स्वामीजी अद्वैतवेदान्ती आसीत्, तथापि परम्परागतायां मूर्तिपूजायां गुरुत्वं प्रददाति स्म। अस्मिन् विषये बहुत्र सः लौकिकोदाहरणैः जनान् बोधयति स्म। यथा-

स्वामिमहाराजः (महाराजमुद्दिश्य)- "महाराज! पश्यतु भवान्। यद्यपि चित्रमिदं तत्त्वतो न भवानेव, केवलं कागदमात्रम्, तथापि रूपसाम्यात् चित्रेऽस्मिन् भवतो रूपाकृतिप्रतिबिम्बनात् एते सर्वे आलेख्यमिदं भवन्तमिवाद्रियन्ते, सम्मानयन्ति च। ततो वस्तुतः किं नाम पार्थक्यं भवतोऽस्य आलेख्यस्य च?

भगवद्भक्ता अपि मतिविशेषेण भगवतः प्रतीकं मन्यन्ते। ते भगवतो लीलाविशेषं मूर्तिविशेषे पश्यन्ति, इति ध्रुवमेव। मूर्तिविशेषे भगवद्दर्शनमित्येतदेव प्रकृतं प्रतीकोपासनातत्त्वम्।

महाराज! तद्बुध्यस्व, सत्यं जानीहि- सर्वेऽपि परब्रह्मसत्तामुपासते। ब्रह्म भक्तभावानुसारं स्वस्वरूपं व्यनक्ति। भक्ताः प्रस्तरधातुप्रभृतिमूर्तिं दृष्ट्वा चिन्मयीमिष्टदेवतां स्मरन्ति; तत एव भक्ता मूर्तिं पूजयन्ति। महाराज! अयमेव मम दर्शनप्रकारः। अन्येषां विषये कथमहं वक्तुं शक्नुयाम्?"

**ब्रह्मचर्यम्**

संन्यासस्य मूलं खलु ब्रह्मचर्यम्। तन्नष्टं चेत् सर्वं नष्टम्। गुजरातस्थलिम्बडीपुर्यां स्वामिमहोदयस्य विपद् जाता। केचन भ्रष्टसाधवः तस्य ब्रह्मचर्यं नाशयितुं प्रयत्नं कृतवन्तः। सर्वथा नामस्मरणेन स्वामिवर्यस्ततः रक्षितः। अपि च तान् साधून् स्वामी परुषवचनैर्धिक्करोति। यथा-

स्वामिमहाराजः (सरोषम्)- "धिक् धिक्! अपि भवन्तः साधवः, पशवो वा? साधुभिः कृते कस्मिंश्चिद् यज्ञे ब्रह्मचर्यपरिहारोऽमार्जनीयः अपराधो ध्रुवम्; वस्तुतः सोऽचिन्तनीय एव। शान्तं पापम्! अस्योच्चारणे पापं, श्रवणेऽपि पापम्। दूरमपेहि स्थानादस्मात्। मुहूर्तेन पापपुरीमेतामहं त्यक्ष्यामि।

यद् ब्रह्मचर्यं स ममास्ति धर्मः,
प्राणैरलं धर्मविवर्जितस्य।
तन्मां यथेष्टं ननु हिंस्त यूयं,
न ब्रह्मचर्यं तु मया विवर्ज्यम्॥ १६१॥"

**स्वदेशप्रीतिः**

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:6(3), June 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

स्वामीजी सर्वदा देशस्य कृते, देशवासिनां दीनदुःखिदरिद्राणां कृते च चिन्तयति स्म। कस्यचित् मत्स्यजीविनः चरित्रं संयोज्य नाट्यकारः स्वामिनः तद्गुणं प्रगुणीकरोति- "अहो करुणं गायत्ययं मत्स्यजीवी।" एवं शतसहस्राणि निरन्नदीनभारतवासिनः अश्रूणि निःसार्य कठोरतमदारिद्र्यसम्पीडितान् बुभुक्षामूर्छितान् सन्तानान् अन्नहीनान् मृत्युमुखपतितानपि रक्षितुमसमर्थाः रोरुद्यन्ते।

अन्यतस्तु प्रबलविलासोन्मत्ताः क्षमतामदगर्विता धनिनो निर्धनान् निष्पिष्य स्वविलासतृष्णां परितर्पयन्ति। शिक्षादीक्षाहीना अन्त्यजाः पुरोहितसम्प्रदायस्य निष्ठुरव्यवहारदीर्णाः सन्तः सनातनधर्मं प्रति वीतश्रद्धा जाताः। हिन्दुधर्ममनादृत्य बहवो जनाः धर्मान्तरग्रहणं कुर्वन्ति। उच्चशिक्षाभिमानिनः स्वार्थान्धा ग्रामवासिनोऽपि स्वजनान् परित्यज्य पन्नीमात्रसाराभारतीयजीवनानि यापयन्तः अधीरमाकुलं निर्ममतमं कालमतिवाहयन्ति।
इत्थमेव ते हिन्दुधर्मस्य शिरसि अभिशापाग्निगोलिकां क्षिपन्ति। तत्फलेन च-

निरर्थानुष्ठानं विदधति जना धर्मविधया
कामाल्लुप्तो देशादधिगतफलो वैदिकविधिः।
कुसंस्काराच्छन्नं विकृतचरितं भारतमभूत्
तदेतद् धर्मीयं वहति किल कङ्कालमधुना॥

अहो! ईदृशानि कति कति पुण्यचित्राणि अखण्डसत्यव्यञ्जकानि मम दृष्टिपथं समागतानि! मम भारतवर्ष! सभ्यताकृष्टसर्वोच्चशृङ्गारूढस्य तव अद्य कथमीदृशी दशा? (पुनर्ध्यायन्) अहो! लक्षलक्षसंन्यासिनो वयं भारतवर्षस्य कठोरश्रमलब्धान्नपुष्टा देशवासिनां हितार्थं किं कुर्मः? अपि वयं दर्शनशास्त्रजटिलतथ्यमात्रोद्गरणपराः एतान् न वञ्चयामः?

श्रीगुरुदेवो मामकथयत्- "शून्योदरे धर्मो न शोभते। स्थूलतण्डुलवस्त्राणां प्रयोजनमिव अनिवार्यम् एव। शून्योदरेभ्यः धर्मोपदेशदानं निरर्थकम्।"

अथवा धर्मप्राणा भारतवर्षीयाः सर्वे एव। गृहे गृहे, कानने, प्रान्तरे, पथि सर्वत्र भारतीयानां धर्म्यक्रियाकलापः प्रस्फुरति। अद्य तु भारतीयानां अवश्यप्रयोजनं शिक्षाप्रसारस्य, अन्नवस्त्रसंस्थापनस्य च। किन्तु निष्किञ्चनः संन्यासी अहं कथं तत् कुर्याम्? अत्र प्रथमं प्रयोजनं सत्यपरायणश्रमकुशलमानवानां, द्वितीयं च अर्थस्य।

**मातृप्रीतिः**

स्मरामि प्रातरद्य मुहुर्मुहुर्ममानन्दमयीं करुणामयीं सेवामयीं जननीम्।

सा साम्प्रतं तिष्ठति मातृमन्दिरे
गोलापमात्रादिसखी-सुसेविता।
स्वज्योतिषोद्दीपितदिग्दिगन्तरा
विस्तारिपादा विसारिकुन्तला॥ १८८॥

तस्याः प्रसन्नाननारुणकिरणैः सहस्रभक्तानां हृत्कमलानि विकसन्ति, तेषां नीरवमनोवीणाः नित्यं निनदन्ति जननीमिष्टमधुरवाणीस्वरलयतानैः, शून्यजीवनपात्राणि च तेषां जातानि पूर्णानि तस्याः स्नेहामृतेन। अहो! तस्याः अरुणचरणरेणुकणैः पवित्रीभवितुं मम मनो भृशमुत्कण्ठते।

जननी सारदामणिः
कल्मषनाशिनी विश्वयोतिनी

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:6(3), June 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

सुतस्नेहहीरकखनिः॥ १८६१॥
मातुरादेशे स्थित्वा दूरदेशे
प्रयास्यामि विपदध्वनि।
तोयनिधिपारे ज्ञानप्रसारे
चित्तं प्रधावति जननि
देवमार्गानुसारिणि॥ १६०॥

**कामिनीकाञ्चनत्यागः**

राजान्तःपुरचारी महाराजो गुरुदेवो वदति— "मद्वचनेन महाराजो वृद्धिं प्राप्नोतु, न च सायासिजनैः सह नर्तकीसङ्गीतसमाजे समुपस्थितः स्यात्।"

स्वामिमहाराजः- "अहो चित्तद्राविणी हे ब्रह्ममयि! तव गीतिः। अनया संस्पृष्टं मम हृदयम्। यथोक्ते सङ्गीते तथा ममापि मतिः। ब्रह्मात्मकं जगत् सर्वम्। ब्रह्मेदं स्थावरजङ्गमात्मकं सर्वम्। ब्रह्मेयं नर्तकी, ब्रह्मायं महाराजः। सर्वं खल्विदं ब्रह्म। प्रसारिता मम दिव्यदृष्टिस्तव सङ्गीतमहिम्ना। सत्यं धन्यासि त्वम्।"

एवं द्वादशदृश्ययुक्तं रूपकमिदं समाप्तिं याति स्वामिनो विवेकानन्दस्य विश्वविजयकामनया। अस्मिन् नाटके महामानवस्यैकस्य समग्रजीवनदर्शनं पाठकानामुदात्तीकरणाय कल्पते। द्वात्रिंशद्वर्षात्मकेन जीवनकालेन आदिशङ्कराचार्यः यथा आकुमारीहिमाचलं परिभ्रमन् हिन्दुधर्मस्य पुनः प्रतिष्ठां कृतवान्, तथैव सहस्रवर्षेभ्यः परं सम्पूर्णे ब्रह्माण्डे हिन्दुत्वस्य शङ्खनादः कृतः स्वामिपादेन द्विचत्वारिंशद्वर्षात्मकेन जीवनकालेन। अपि च दाराशिकोहादीनां प्रयत्नैः अनुवादेन परिचितचरस्य भारतीयदर्शनस्य प्रत्यक्षव्याख्यानम् ऐदम्माथम्येन वैदेशिकैः स्वामिनो विवेकानन्दस्य मुखादेव श्रुतम्। अपि च स्वामिनो विवेकानन्दस्य "प्रैक्टिकल-वेदान्त", राष्ट्रनैतिकचिन्तनम्, भुवनीकरणचिन्तनम्, राष्ट्रजागरणसूत्राणि च शिक्षणीयानि अनुकरणीयानि च सन्ति।

**उपसंहारः**

यतीन्द्रविमलचौधुरिविरचितं भारतविवेकम् इति नाटकं स्वामिविवेकानन्दस्य जीवनचरितस्य, विचारधारायाः, तथा च राष्ट्रचेतनायाः सजीवचित्रणम् अस्ति। अस्मिन् नाटके विवेकानन्दः केवलं संन्यासी न, अपि तु भारतस्य आध्यात्मिकजागरणस्य दूतः, मानवतायाः सेवकः, तथा च विश्वमानवस्य मार्गदर्शकः इति रूपेण प्रस्तुतः दृश्यते। नाटककारः तस्य जीवनं यथार्थरूपेण चित्रयित्वा आदर्शपुरुषरूपेण प्रतिष्ठापयति।

नाटकस्य प्रमुखो नायकः नरेन्द्रनाथरूपेण बाल्यकालात् एव युक्तिवादी, जिज्ञासु, तर्कशीलश्च आसीत्। तथापि तस्मिन् अन्तःकरणे ईश्वरदर्शनस्य तीव्रा आकाङ्क्षा विद्यमाना आसीत्। विविधगुरुसमीपे गत्वा अपि तस्य शान्तिः न प्राप्ता, यावत् सः श्रीरामकृष्णपरमहंसस्य समीपं न प्राप्तवान्। तत्र गुरोः कृपया तस्य जीवनं पूर्णतया रूपान्तरितम्। अयं गुरु-शिष्यसम्बन्धः अस्य नाटकस्य प्रमुखं तत्त्वम् अस्ति।

स्वामिविवेकानन्दस्य मातृभक्तिः अस्मिन् नाटके विशेषतया चित्रिता। सः जननीं केवलं लौकिकमातरं न पश्यति, अपि तु चिन्मयीशक्तिरूपेण वन्दते। सारदामणि-रामकृष्णयोः प्रति तस्य प्रगाढभक्तिः तस्य आध्यात्मिकजीवनस्य आधारः भवति। नाटककारः दर्शयति यत् तस्य जीवनस्य सर्वसार्थक्यं मातृप्रेमे, गुरुभक्तौ, तथा च देशसेवायां निहितम् अस्ति।

नाटके विवेकानन्दस्य सामाजिकचिन्तनं अपि स्पष्टतया दृश्यते। सः भारतस्य दारिद्र्यं, अज्ञानं, तथा सामाजिकविषमतां दृष्ट्वा अत्यन्तं करुणाविष्टः भवति। तस्य मनसि सततं प्रश्नः उदेति— "किं धर्मः केवलं ग्रन्थेषु अस्ति, उत जनसेवायामपि?" इति। अयं भावः तं कर्मयोगमार्गे प्रेरयति। अतः सः शिक्षाप्रसारं, दरिद्रसेवां, तथा राष्ट्रजागरणं जीवनस्य लक्ष्यं करोति।

स्वामिविवेकानन्दस्य अद्वैतवेदान्तदृष्टिः अस्य नाटकस्य मूलतत्त्वेषु अन्यतमम्। सः सर्वभूतेषु ब्रह्मदर्शनं करोति। तस्य दृष्ट्या न कोऽपि उच्चः न च नीचः; सर्वे मानवाः एकस्यैव ब्रह्मणः रूपाणि सन्ति। अयं विचारः तस्य सार्वभौमिकमानवतावादस्य आधारः भवति। "सर्वं खल्विदं ब्रह्म" इति भावं सः जीवनक्रियायां परिणमयति।

नाटककारः विवेकानन्दस्य ब्रह्मचर्यनिष्ठां अपि अत्यन्तं महत्त्वेन वर्णयति। ब्रह्मचर्यं तस्य जीवनशक्तेः मूलम् आसीत्। तेन एव सः मानसिकबलं, ओजस्विता, तथा च वाग्मितां प्राप्तवान्। अस्यैव कारणात् सः विश्वे भारतीयदर्शनस्य प्रतिनिधिः अभवत्।

विवेकानन्दस्य राष्ट्रभावना अपि अस्मिन् नाटके सुस्पष्टा। सः भारतं केवलं देशरूपे न पश्यति, अपि तु आध्यात्मिकमातृभूमिरूपेण मन्यते। तस्य मतं यत् भारतस्य उन्नतिः केवलं आत्मबलजागरणेन एव सम्भवति। अतः सः जनान् जागरयति- "उत्तिष्ठत, जाग्रत, प्राप्य वरान्निबोधत" इति।

अतः यतीन्द्रविमलचौधुरिविरचितं भारतविवेकम् इति नाटकं स्वामिविवेकानन्दस्य चरित्रचित्रणद्वारा भारतीयसंस्कृतेः, वेदान्तदर्शनस्य, तथा मानवतावादस्य अमूल्यं सन्देशं प्रसारयति। विवेकानन्दस्य जीवनं अस्मान् शिक्षयति यत् धर्मः सेवा एव, ज्ञानम् आचरणम् एव, तथा ईश्वरः सर्वभूतेषु विद्यमानः अस्ति।